अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।

यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ ८.५॥

antakāle ca māmeva smaranmuktvā kalevaram |
yaḥ prayāti sa madbhāvaṁ yāti nāstyatra saṁśayaḥ || 8.5||

यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम्।

तं तमेवैति कौन्तेय सदा तद्भावभावितः॥ ८.६॥

yaṁ yaṁ vā'pi smaranbhāvaṁ tyajatyante kalevaram |
taṁ tamevaiti kaunteya sadā tadbhāvabhāvitaḥ || 8.6||

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च।

मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥ ८.७॥

tasmātsarveṣu kāleṣu māmanusmara yudhya ca |
mayyarpitamanobuddhirmāmevaiṣyasyasaṁśayaḥ || 8.7||

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।

परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥ ८.८॥

abhyāsayogayuktena cetasā nānyagāminā |
paramaṁ puruṣaṁ divyaṁ yāti pārthānucintayan || 8.8||